वस्त्रं दशान्तमादद्यात् परिधाय तथा पुनः । आरुह्योपनाहौ यानमारुह्यैव च पादुके । ईशायान्तु रथो ग्राह्यश्छत्रदण्डौ च धारयेत् । आयुधानि समादाय तथा भूष्यं विभूषणम् । धर्म्मध्वजौ तथा स्पृष्ट्वा प्रविश्य च तथा गृहम् । अवतीर्य च सर्व्वाणि जलस्थानानि वै द्विजाः ! । द्रव्याण्यन्यान्यथादाता स्पृष्ट्वा योब्राह्मणः पठेत् । प्रतिग्रहीता सावित्रीं सर्व्वत्रैव प्रकीर्त्तयेत् । ततस्तु साद्धं द्रव्येण तस्य द्रव्यस्य दैवतम्" । भूमिर्विष्णुदेवताकेत्यादि कीर्त्तयेदित्यर्थः । "समापयेत्ततः पश्चात् कामस्तुत्या प्रतिग्रहम् । विधिं धर्म्ममथोज्ञात्वा यस्तु कुर्य्यात् प्रतिग्रहम् । दाता सह तरत्येव कालदुर्गाणि वै द्विजः" । विष्णुध० "गां पुच्छे करिणं करे" मिता० वाक्यस्य प्रथमं करे गृहीत्वा पश्चादारोह इत्यर्थः एवमन्यत्र विरोधः समाधेयः । आदीयते औषधार्थं वैद्यैः आ+दा—कर्मणि ल्युट् ङीप् । २हस्तिघोषायां स्त्री रत्नमाला ।

**आदाय** अव्य० आ+दा—ल्यप् । गृहीत्वेत्यर्थे "तेषां सर्व्वस्वमादाय राजा राष्ट्रात् प्रवासनम्" मनुः । आ+दा—भावे घञ् । २आदाने पु० ।

**आदायचर** त्रि० आदाय चरति चर—ट उप०स० । गृहीत्वा चारिणि । "द्विषन् वनेचराग्र्याणां त्वमादायचरोवने" भट्टिः ।

**आदायिन्** त्रि० आ+दा—णिनि स्त्रियां ङीप् । ग्रहीतरि "योऽदत्तादायिनो हस्ताल्लिप्सेत ब्राह्मणोधनम् । याजनाध्यापनेनापि यथा स्तेनस्तथैव सः" मनुः ।

**आदार** पु० आ+दृ—वेदे बा० घञ् । आदरे "आदारो वा सभानाम्" ऋ० १,४६,४ ।

**आदारिविम्बी** स्त्री आदारिणी विम्बीव नि०पुंवत् । (आनेरी) अम्लवेतसतुल्यपुष्पायां लतायां "आदारिविम्बीं सुकदम्बपुष्पीं विपाच्य सर्पिर्विपचेत् कषाये" सुश्रु० ।

**आदि** पु० प्रथमं दीयते गृह्यते आ+दा—कि । १प्रथमे, २प्राक्सत्तायाम्, ३कारणे, ४सामीप्ये, ५प्रकारे, ६अवयवे च । ७आद्ये त्रि० अमरः । "जगदादिरनादिस्त्वम्" कुमा० । "अपएव ससर्जादौ तासु वीजमवासृजत्" । "वेदशब्देभ्यएवादौ पृथक्संस्थाश्च निर्म्ममे" "मरीच्यादींस्तथा मुनीन्" इति च मनुः । "कथमेतत् विजानीयां त्वमादौ प्रोक्तवानिति" । "अहमादिश्च भूतानाम्" इति च गीता । "भूवादयोधातवः" पा० । भूश्च वाश्च भूवौ आदिश्च आदिश्च आदी भूवौ आदी येषाम् आद्य आदिशब्दः प्रभृत्यर्थः द्वितीयःप्रकारार्थस्तेन भूप्रभृतयो वासदृशाः क्रियावाचित्वेन धातवइत्यर्थः । एवमेव वैया० भू० । आदिशब्देन गणोऽपि सूच्यते । "भ्वाद्यदादी जुहोत्यादिर्दिवादिः स्वादिरेव च । तुदादिश्च रुधादिश्च तनक्र्यादिचुरादयः" व्या० कारिका । तत्र भवः दिगा० यत् । आद्यः डिमच् । आदिमः । आदिभवे त्रि० ।

**आदिकर** त्रि० आदिं करोति अहेतादावपि ट स्त्रियां ङीप् । प्रथमकारके प्राक्सत्ताकर्त्तरि ।

**आदिकर्त्तृ** पु० आदिः कर्त्ता । आद्यकारके ईश्वरे "कस्माच्च ते न नमेरन् महात्मन् ! गरीयसे ब्रह्मणोऽप्यादिकर्त्रे" गीता ।

**आदिकर्म्मन्** न० कर्म्म०स० । १क्रियाकूटात्मकस्य कर्मणोऽवयवभूते प्रथमे कर्म्मणि प्रथममारभ्यमाणक्रियायाम् । "उदुपधाद्भ्वादेर्विभाषा भावादिकर्मणोः" "भावादिकर्म्मणोरन्यतरस्याम्" "आदिकर्म्मणि क्तः कर्त्तरि च" पा० । २प्रथमजे कर्म्ममात्रे च । व० । ३तथाकर्म्मयुक्ते त्रि० ।

**आदिकवि** पु० आदिराद्यःकविः । हिरण्यगर्भे तस्य प्रथमोत्पन्नत्वात् स्वयंप्रतिभातवेदत्वाच्च कवितया तथात्वम् । "तेने ब्रह्म हृदा य आदिकवये" भाग० । २वाल्मीकौ च ।

**आदिकारण** न० आद्यं कारणम् । १परमेश्वरे तदधीनत्वात् इतरकारणानाम् स हि प्रथमं स्वोपाधिभूताविद्यया सृज्यमानजीवादृष्टवशादिदमित्थं कर्त्तव्यमिति ईक्षणपूर्व्वकं स्रष्टव्यपदार्थाकारेण विवर्त्तमानः सूक्ष्मभूतानि प्रथममुत्पाद्य ततः स्थूलभूतानि भौतिकानि च सृजतीत्यागमसिद्धम् इति वेदान्तिनः । सांख्यमते २प्रधाने प्रधानं हि मूलकारणं तस्यैव महदाद्याकारेण परिणमनात्तथात्वम् । नैयायिकादिमते कारणशब्दस्य निमित्तार्थत्वे ईश्वरस्यैव तथात्वम् । समवायिकारणार्थत्वे परमाणूनां मूलकारणत्वमिति भेदः इति तेन तन्मते ३ईश्वरे ४परमाणुषु च ।

**आदिकाव्य** न०आदि आद्यं काव्यं पादचतुष्टयरूपच्छन्दोबद्धं वाक्यम् । वाल्मीकिरचिते रामायणे तस्य चाद्यकाव्यत्वं दर्शितं तत्रैव आदिका० २सर्गे "ददर्श क्रौञ्चयोस्तत्र मिथुनं चारुदर्शनम् । तस्माच्च मिथुनादेकमागत्यानुपलक्षितः । जघान बद्धानुशयो निषादो मुनिसंनिधौ । तं शोणितपरीताङ्गं चेष्टमानं महीतले । दृष्ट्वा क्रौञ्ची रुरोदार्त्ता करुणं खे परिभ्रमा । तं तथा निहतं दृष्ट्वा निषादेनाण्डजं वने । मुनेः शिष्यसहायस्य कारुण्यं समजायत । ततः करुणवेदित्वादधर्म्मोऽयमिति द्विजोत्तमः ।